# शिशुपालवधः

उग्रसेनः मथुरायाः महाराजः । तस्य पुत्रः कंसः, पुत्री देवकी । देवक्याः पतिः वसुदेवः । दुष्टः कंसः जनकम् उग्रसेनं, देवकीं, वसुदेवं च कारागृहे स्थापयित्वा स्वयमेव महाराजः अभवत् । अनन्तरं सः एकैकशः भगिन्याः देवक्याः नवजातानां शिशूनां हननम् अकरोत् । देवक्याः सप्तमः पुत्रः बलरामः, अष्टमः कृष्णः च मथुरायां जन्म प्राप्तवन्तौ । कंसात् भीतः देवकीवसुदेवौ बलरामं, कृष्णं च गोकुले नन्दगोपस्य गृहे गुप्तरूपेण स्थापितवन्तौ । नन्दगोपस्य पत्नी यशोदा आसीत् । तौ बलरामं, कृष्णं च बहुप्रीत्या पालितवन्तौ । दुष्टः कंसः कृष्णं बलरामं च मारयितुम् अनेकान् राक्षसान् प्रेषितवान् । परन्तु तौ बालकौ सुलभतया सर्वेषां राक्षसानां च हननं कृतवन्तौ । अन्ते तौ मथुरां गत्वा कंसस्य हननं च कृत्वा मातामहं, जनकं, जननीं च कारागृहात् मोचितवन्तौ । उग्रसेनः पुनः महाराजः अभवत् ।

कृष्णस्य पितृष्वसा श्रुतश्रवा । तस्याः पतिः दमघोषः । तयोः शिशुपालः, दन्तवक्रः इति द्वौ पुत्रौ । शिशुपालः, दन्तवक्रः च बाल्यात् एव बहुदुष्टौ आस्ताम् । शिशुपालः विदर्भदेशस्य राजकुमारीं रुक्मिणीं परिणेतुम् इच्छति स्म । परन्तु रुक्मिण्याः प्रीतिः कृष्णे एव आसीत् । यदा कृष्णः रुक्मिणीं परिणीतवान्, शिशुपालः कुपितः भूत्वा कृष्णेन सह युद्धं कृत्वा पराजयमेव प्राप्तवान् । तस्य क्रोधः अधिकः अभवत् ।

कारागृहम् - prison
हननम्, वधः - killing
गोकुलम् - Gokula
गुप्तरूपेण - secretly
पालितवन्तौ - protected
दुष्टः - wicked
सुलभतया - easily
मोचितवन्तौ - released
पितृष्वसा - father's sister
परिणेतुम् - to marry
पराजयः - defeat
क्रोधः - rage
धर्मिष्ठाः - righteous people
राजसूययागः - sacrifice
अग्रपूजा - highest honor
निन्दनम् - insult

कृष्णस्य अपरा पितृष्वसा कुन्तीदेवी । तस्याः पाण्डुमहाराजस्य च पुत्राः पञ्च पाण्डवाः सर्वे धर्मिष्ठाः, उत्तमगुणयुक्ताः । पाण्डवेषु ज्येष्ठः युधिष्ठिरः इन्द्रप्रस्थस्य महाराजः । एकदा युधिष्ठिरः राजसूययागं कृतवान् । यागार्थं विभिन्नराज्येभ्यः महाराजाः आगतवन्तः । तदा कौरव-पाण्डवानां पितामहः भीष्मः राजसभायाम् अग्रपूजां प्राप्तुं श्रीकृष्णः एव श्रेष्ठः इति निश्चितवान् । युधिष्ठिरः कृष्णस्य पूजायाः प्रारम्भं कृतवान् । शिशुपालः कोपेन बहुवारं कृष्णस्य निन्दनं कृत्वा, कृष्णबलरामयोः, पाण्डवानां च विरुद्धं युद्धं प्रारब्धवान् । अन्ते कृष्णः सुदर्शनचक्रेण शिशुपालस्य, दन्तवक्रस्य च हननं कृतवान्, शान्तिं च स्थापितवान् । राजसूययागः विघ्नेन विना सम्पूर्णः अभवत् । सर्वे जनाः सन्तुष्टाः अभवन् ।

